# आदर्शप्रश्नपत्रम्
# हाईस्कूल परीक्षा–2012
# संस्कृतम् (सामान्यम्)

समय : घंटात्रयम् | पूर्णाङ्काः 100

निर्देशाः :– (i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

1. उचित विकल्पं चित्वा लिखत– 4

(क) 'मन+हरः' इत्यस्मिन् पदे सन्धिः अस्ति–

(अ) व्यंजन सन्धिः (ब) विसर्ग सन्धिः

(स) यण् सन्धिः (द) दीर्घ सन्धिः

(ख) 'सदा+एव' इत्यस्य संधिः अस्ति–

(अ) सदाएव (ब) सदेव

(स) सदैव (द) सदऐव

(ग) 'भानूदयः' इत्यस्मिन् पदे सन्धिः अस्ति –

(अ) दीर्घ सन्धिः (ब) यण् सन्धिः

(स) अयादि सन्धिः (द) वृद्धि सन्धिः

(घ) 'व्यंजनसन्धेः उदाहरणं अस्ति–

(अ) विद्यालयः (ब) दुर्जनः

(स) जगन्नाथः (द) पावकः

2. (क) 'हरिहरौ' इत्यस्य समासविग्रहः अस्ति– 3

(अ) हरि च हरौ (ब) हरिं च हरम् च

(स) हरिश्च हरश्च (द) हरिः च हरौ च

(ख) 'पंचवटी' इत्यस्मिन् पदे समासः अस्ति–

(अ) द्वन्द्व समासः (ब) द्विगु समासः

(स) बहुब्रीहि समासः (द) कर्मधारय समासः

(ग) अव्ययीभाव समासस्य उदाहरणं अस्ति–

(अ) सचक्रम् (ब) महापुरूष

(स) रोगमुक्तः (द) असत्यम्

3. (क) 'अलभत्ः' इत्यस्मिन् पदे धातुः अस्ति– 4

(अ) गम् (ब) खाद्

(स) लभ् (द) भू

(ख) 'पास्यति' इत्यस्मिन् पदे लकारः अस्ति–

(अ) लोट् लकारः (ब) लट् लकारः

(स) लड्. लकारः (द) लृट् लकारः

(ग) 'सेवन्ते' इत्यस्मिन् पदे वचनं अस्ति–

(अ) एकवचनम् (ब) बहुवचनम्

(स) द्विवचनम्

(घ) 'भवतु; इत्यस्मिन् पदे पुरूषः अस्ति–

(अ) प्रथम पुरूषः (ब) उत्तम पुरूषः

(स) मध्यम पुरूषः

4. (क) अधोलिखितेषु उपसर्गः नास्ति– 4

(अ) अधि (ब) प्रति

(स) दुर् (द) विचलः

(ख) 'प्रतिवादः' इत्यस्मिन पदे उपसर्गः अस्ति–

(अ) वादः (ब) प्रति

(स) दुर् (द) परि

(ग) माता किल मनुष्याणां देवतानां च ——————————।(देवेन / दैवतम्)

(घ) ———————— परार्थं कुर्वाणा नावेक्षन्ते प्रतिक्रियाम्।(सन्तः / सताम्)

5. (क) 'सेवमान्:' इत्यस्मिन् पदे प्रत्ययः अस्ति– 4

(अ) शानच् (ब) तुमुन्

(स) क्त्वा (द) शतृ

(ख) 'अजा' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(अ) आप् (ब) जाप्

(स) ङ्गाप् (द) टाप्

(ग) 'शतृ' प्रत्ययस्योदाहरणं अस्ति–

(अ) पठितव्यम् (ब) पठन्

(स) पठितुम् (द) पठ

(घ) 'ल्यप्' प्रत्ययस्य उदाहरणं अस्ति–

(अ) पश्यत् (ब) रक्षितम्

(स) कृतवान् (द) प्रणम्य

6. (क) अधोलिखितेषु अव्ययम् अस्ति– 2

(अ) कथा (ब) करोति

(स) रूपं (द) कदा

(ख) 'विद्या माता इव रक्षति' अस्मिन् वाक्ये अव्ययं अस्ति–

(अ) माता (ब) इव

(स) विद्या (द) रक्षति

7 युग्ममेलनं कुरूत– 4

| | क | ख |
|---|---|---|
| 1. | वेदव्यासः | इक्षुः |
| 2. | वाग्भूषणम् | गुप्तकालस्य |
| 3. | मधुरताम् | महाभारतभ् |
| 4. | स्वर्णयुगस्य | भूषणम् |

8. शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत– 4

(1) चंचलं मनः न अनुभ्रामयेत्। ( )

(2) दयानन्दः सामाजिक कुप्रथानां निवारणं कृतवान्। ( )

(3) सगरस्य पुत्राः भस्मीभूताः जाताः। ( )

(4) रघुः वरतन्तु शिष्यः आसीत्। ( )

9. उचित शब्देन रिक्त स्थानानि पूरयत्– 4

(छत्रसालः, स्मरन्तु, विश्वबन्धुत्वं, मनः)

1) तव अभिगमेन में ––––––––– न तृप्तम्।

2) ––––––––– सम्पोषक संस्कृतम्।

3) भारत मातृभू संरक्षकः–––––––– आसीत्।

4) पुरातनं स्वपौरूषं ––––––– वीरबन्धवः।

10. अधोलिखित प्रश्नानां उत्तराणि एकपदेन देयानि– 4

1) छत्रसालस्य पितुः नाम किम् ?

2) सवौत्तम भूषणं किं अस्ति ?

3) के मार्गायासं परिहरन्ति स्म ?

4) खगोलशास्त्रं कस्मिन् क्षेत्रे प्रसिद्धम् ?

11. अधोलिखितप्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि एकवाक्येन देयानि– 6

(क) अस्माभिः किं कर्त्तव्यम् ?

(ख) ब्राह्मणपरिवारः केन समासादितः ?

(ग) कः मृतोऽपि जीवति ?

(घ) शिष्यान् कथं परीक्षेत् ?

12. अधोलिखितानां चतुर्णां शब्दानां रूपाणि निर्देशानुसार त्रिषु वचनेषु लिखत– 4

क) अस्मद्– षष्ठी विभक्ति

ख) शाला– तृतीया विभक्ति

ग) देव– चतुर्थी विभक्ति

घ) तत् (पुल्लिंग)– पंचमी विभक्ति

13. अधोलिखित पंच अशुद्ध कारक वाक्यानां शुद्धिः करणीया – 5

(क) वृक्षस्य पत्रं पतति।

(ख) गुरूं नमः।

(ग) अहं आपणं गच्छति।

(घ) दशरथः अयोध्यायाः राजा अस्ति।

(ड.) सीता सुधाखण्डं लिखति।

च) अलं विवादाय।

14. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्व पाठ्यपुस्तकस्य सुभाषितद्वयं लिखत– 4

15. अधोलिखित वाक्यानां कथानुसारेण क्रम संयोजनं कुरूत – 5

(क) ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहं अगच्छत्।

(ख) गड्.गातीरे मार्कण्डेयः नाम कश्चन मुनिः वसति स्म।

(ग) शिष्यः अनन्तरं रामनाथपुरं प्रति प्रस्थितवान्।

(घ) मया रामदेवस्य जीवनं एव अनुसरणीयम्।

(ड.) वासुदेवः तस्य प्रिय शिष्यः आसीत्।

16. अधोलिखितगद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत– 5x2=10

(अ) सूर्यवंशस्य राजा सगरः आसीत्। सः एकदा अश्वमेघयागं कृतवान्। यागस्य अन्ते यागस्य अश्वः यत्र–तत्र संचारं कृतवान्। अश्वमेघं कृत्वा सगरः स्वयं इन्द्रः भविष्यति इति देवेन्द्रस्य असूया आसीत्। तस्मात् सः यागस्य विहनं कर्तुं मार्गं चिन्तितवान्। ततः अश्वं गृहीत्वा पाताललोके कपिलमुनेः पुरतः स्थापितवान्। तदा मुनिः तपः कुर्वन् ध्याने आसीत्। अतः सः किमपि न ज्ञातवान्।

(क) सूर्यवंशस्य राजा कः आसीत् ?

(ख) सः एकदा किं कृतवान् ?
(ग) यागस्य अश्वः कुत्र संचारं कृतवान् ?
(घ) कः यागस्य विघ्नं कर्तुं मार्गं चिन्तितवान् ?
(ड.) 'भविष्यति' इत्यस्मिन् पदे का धातुः कः च लकारः अस्ति ?
(ब) सामाजिक कुप्रथानां निवारणाय दयानन्दः आर्यसमाजस्य स्थापनां कृतवान्। महर्षिः विधवाऽबलानां दलितवर्गाणां गवां च उद्धाराय सदैव प्रायतत्। स्वातन्त्र्य भावनाऽपि प्रथममनेनैव महर्षिणास्माकं हृदयेषु जागरिता। नानाविधानि दुःखानि सोढ्वापि नायं कर्त्तव्यविमुखो जातः। येनास्य महापुरूषस्य ख्यातिः सर्वत्र व्याप्ता।
(क) कः आर्यसमाजस्य स्थापनां कृतवान् ?
(ख) महर्षिः केषाम् उद्धाराय सदैव प्रायतत् ?
(ग) स्वातन्त्र्यभावनाऽपि प्रथमं केन अस्माकं हृदयेषु जागरिता ?
(घ) नानाविधानि कानि सोढ़वापि नायं कर्त्तव्यविमुखो जातः ?
(ड.) अस्य महापुरूषस्य ख्यातिः कुत्र व्याप्ता ?
(स) ''सरलसंस्कृतमेव भारतराष्ट्रस्य राष्ट्रभाषा भवेत्।'' अयमेव भावः श्रीमातुः कथनेऽपि दृश्यते। सा 'संस्कृतमेव राष्ट्रभाषा भवितुमर्हति' इल्युक्तवती। अन्येऽपि प्रसिद्धाः नायकाः संस्कृतस्य प्रशंसां कृतवन्तः। महनीयतां च स्वीकृतवन्तः। यथा–प्रथमः राष्ट्रपतिः डॉ. राजेन्द्र प्रसादः कथितवान् यत्–संस्कृतसाहित्यं न केवलं भारतस्य कृते अपितु मानवजातेः कृते अमूल्यधनमस्ति।''
(क) सरल संस्कृतमेव भारतराष्ट्रस्य किं भवेत् ?
(ख) प्रसिद्धाः नायकाः कस्य प्रशंसां कृतवन्तः ?
(ग) भारतस्य राष्ट्रपतिः कः आसीत् ?
(घ) संस्कृत साहित्य मानव जातेः कृते किं अस्ति ?
(ड.) 'कथितवान्' इत्यस्य पदस्य प्रकृतिं प्रत्ययंच पृथक् कुरूत।

प्र.17 अधोलिखित पद्यांशेषु पद्यांशद्वयस्य प्रश्नानां उत्तराणि संस्कृत भाषायां देयानि 5x2=10

(अ) केयूरा न विभूषयन्ति पुरूषं हारा न चन्द्रोज्ज्वला,
न स्नानं न विलेपनं न कुसुमं न अंलकृता मूर्धजा।
वाण्येका समलंकरोति पुरूषं या संस्कृता धार्यते,
क्षीयन्ते खलु भूषणानि वाग्भूषणम् भूषणम्।।
(क) चन्द्रोज्ज्वलाः हाराः कं न विभूषयन्ति ?
(ख) वाण्येका पुरूषं किं करोति ?
(ग) कानि खलु क्षीयन्ते ?
(घ) 'सततं' भूषणं किम् ?
(ड.) 'सततं' इत्यस्य पदस्य समानार्थी पदं लिखत।
(ब) घनोपगढं गगनं न तारा,
न भास्करो दर्शनमभ्युपैति।
नवैंजलोर्धैधरणी वितृप्ता,
तमोविलिप्ता न दिशः प्रकाशाः।।
(क) घनोपगूढं किम् ?
(ख) तारा भास्करः च किं न अभ्युपैति ?
(ग) धरणी कैः वितृप्ता
(घ) तमोलिप्ताः का न प्रकाशाः ?
(ड.) 'गमनं' इत्यस्य शब्दस्य विभक्तिं वचनंच लिखत।

(स) मनसा चिन्तितं कार्यं वाचा नैव प्रकाशयेन्।
मन्त्रेण रक्षयेद् गूढं कार्ये चाऽपि नियोजयेत् ?

(क) कार्यं क्या चिन्तितम् ?

(ख) वाचा किं न प्रकाशयेत् ?

(ग) गूढं केन रक्षयेत् ?

(घ) कार्ये किं नियोजयेत् ?

(ड.) 'रक्षयेत्' इति शब्दस्य धातुः, लकारं, पुरूष, वचनं च लिखत।

प्र.18 अधोलिखितम् अपठितगद्यांशम् सम्यक् पठित्वा प्रश्नानाम् उत्तराणि लिखत– 5

'शरीरधर्मस्य प्रथमं साधनमस्ति।'' शरीरमाघं खलु धर्मसाधनम्। शरीरस्य आरोग्यं व्यायामेन सिद्धयति। यः व्यायामं करोति तस्य प्राणशक्तेः आपदः स्वयमेव दूरं गच्छन्ति। व्यायामेन शरीरे शुद्ध रक्त संचारं भवति। इन्द्रियाणि सुस्थानि स्वस्थानि च भवन्ति। जठराग्नि दीप्तः भवति। परिवृद्धम् उदरं सड्.कोच च गच्छाति। मस्तिष्कं ऊर्वरं भवति। अस्मिन् लोके जनैः वयोऽनुसारं को ऽपि व्यायामः अवश्य करणीयः।

(क) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

(ख) धर्मस्य प्रथमं साधनं किमस्ति ?

(ग) कीदृशम् उदरं व्यायामेन सड्.कोच गच्छति ?

(घ) अस्य गद्यांशस्य सारं लिखत।

19. स्वस्य प्राचार्यस्य कृते छात्रवृत्यर्थं प्रार्थना पत्रं लिखत। 4

अथवा

स्वस्य वार्षिक परीक्षा परिणामं सूचयितुं स्वमित्रं प्रति पत्रं लिखत।

20. अधोलिखितेषु एकं विषयं स्वीकृत्य पूर्ति शब्देषु संस्कृते निबंधं लिखत। 10

(क) सदाचारः

(ख) महाकवि कालिदासः

(ग) अनुशासनम्

# आदर्श–उत्तरपत्रम्
# हाईस्कूल परीक्षा–2012
# संस्कृतम् (सामान्यम्)

(1) **उचित विकल्प चयन**

(क) ब. विसर्ग सन्धिः 4

(ख) स. सदैव

(ग) अ दीर्घ सन्धिः

(घ) स जगन्नाथः

(2) **उचित विकल्प चयन** **3**

(क) स हरिश्च हरश्च

(ख) ब द्विगु समासः

(ग) अ सचक्रम्

(3) **उचित विकल्प चयन** **4**

क स लभ्

ख द लृट्लकारः

ग. ब बहुवचनम्

घ. अ प्रथमपुरूषः

(4) **उचित विकल्प चयन** **4**

क द विचलः

ख ब प्रति

ग. दैवतम्

घ. सन्तः

(5) **उचित विकल्प चयन** **4**

क अ शानच्

ख द टाप्

ग ब पठन्

घ द प्रणम्य

(6) **उचित विकल्प चयन** **2**

क द कदा

ख ब इव

**निर्देशः– प्रश्न क्रमांक 1 से 6 तक सही विकल्प लिखने पर प्रत्येक पर अंक 1–1 प्राप्त होगा।**

(7) 1. वेदव्यासः महाभारतम् 4

2. वाग्भूषणम् भूषणम्

3. मधुरताम् इक्षुः

4. स्वर्णयुगस्य गुप्तकालस्य

**निर्देशः:– सही विकल्प लिखने पर प्रत्येक पर 1–1 अंक प्राप्त होगा।**

(8) शुद्धाशुद्ध वाक्य चयनम् 4

क आम्

ख आम्

ग आम

घ न

**निर्देशः– प्रत्येक शुद्ध/अशुद्ध वाक्य लिखने पर प्रत्येक पर 1–1 अंक प्राप्त होगा।**

(9) **उचित शब्देन रिक्त स्थानानि** 4

अ मनः

ब. विश्वबन्धुत्वम्

स. छत्रसालः

द. स्मरन्तु

**निर्देशः– प्रत्येक उचित शब्देन रिक्त स्थानानि पर 1–1 अंक प्राप्त होगा।**

(10) **एकपदेन देयानि** **4**

क श्रीचम्पतरायः

ख वाग्भूषणम्

ग पथिकाः

घ. कालगणनाक्षेत्रे

**निर्देशः– एकपदने देयानि पर 1–1 अंक प्राप्त होगा।**

**(11) एक पदेन प्रश्नानाम् उत्तराणि** **2x3=6**

क अस्माभिः कर्त्तव्यम् अस्ति यत् क्षणमपि व्यर्थं न यापनीयम्।''

ख ब्राह्मण परिवारः घटोत्कचेन समासादितः।

ग रामदेवः मृतोऽपि जीवति।

घ शिष्यान् शीलगुणादिभिः परीक्षेत्।

**निर्देशः– एक पदेन उत्तराणि पर 1–1 अंक प्राप्त होगा।**

**(12) चतुर्णां शब्दानां रूपाणि त्रिषुवचनेषु उत्तराणि** **4**

| स.क्र. | शब्द | विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|---|---|
| 1. | अस्मद् | षष्ठी | मम मे | आवयोः–नौ | अस्मकाकम्–नः |
| 2. | शाला | तृतीया | शालया | शालाभ्याम् | शालाभिः |

| | | | | | |
|---|---|---|---|---|---|
| 3. | देव | चतुर्थी | देवाय | देवाभ्याम् | देवेभ्यः |
| 4. | तत्(पु) | पंचमी | तस्मात् | ताभ्याम् | तेभ्यः |
| 5. | फल | द्वितीया | फलम् | फले | फलानि |

**निर्देश :– प्रत्येक सही उत्तरों पर 1–1 अंक प्राप्त होगा।**

**(13) अशुद्ध वाक्यानां शुद्धि करणीया–** **5**

(क) वृक्षात् पत्रं पतति।

(ख) गुरवे नमः।

(ग) अहं आपणं गच्छामि।

(घ) दशरथः अयोध्यायाः राजा आसीत्।

(ड.) सीता सुधारवण्डेन लिखति।

(च) अलं विवादेन।

**निदेशः– निर्देशानुसार शुद्धि करणीया प्रत्येक पर 1–1 अंक प्राप्त होगा।**

(14) पाठ्यपुस्तकाधारे शुद्ध लेखनं पाठान्तरं दृष्ट्वा अंड्.काः प्रदेयाः।

**निर्देशः– इसी तरह के अन्य शुद्ध सुभाषित श्लोक लिखने पर प्रत्येक श्लोक पर 2–2 अंक प्राप्त होंगे।**

15. वाक्यानाम् कथानुसारेण क्रम संयोजन 5

क. मया रामदेवस्य जीवनं एव अनुसरणीयम्।

ख. वासुदेवः तस्य प्रिय शिष्यः आसीत्।

ग. शिष्य अनन्तरं रामनाथपुर प्रति प्रस्थितवान्।

घ. ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहं अगच्छत्।

ड. मया रामदेवस्य जीवनं एव अनुसरणीयम्।

**निर्देशः– प्रत्येक सही उत्तर पर 1–1 अंक प्राप्त होगा। (कोई 5)**

**16 अ शुद्ध उत्तरो परि एकं अंड्.क प्रदेयम्।(केचित् द्वयम्)** **5x2=10**

(क) सूर्यवंशस्य राजा सगरः आसीत्।

(ख) सः एकदा अश्वमेघयागं कृतवान्।

(ग) यागस्य अश्वः यत्र तत्र संचारं कृतवान्।

(घ) देवेन्द्रः यागस्य विघ्नं कर्तुं मार्गं चिन्तितवान्।

(ख) भविष्यति इत्यस्मिन् पदे भू (भव्) धातु लृट् लकारः।

**निर्देशः– शुद्ध उत्तरों पर 1–1 अंक प्राप्त होगा।**

17 ब– गद्यांशानाम् प्रश्नानाम् उत्तराणि 10

(क) महर्षिः दयानन्दः आर्य समाजस्य स्थापनां कृतवान्।

(ख) महर्षिः विधवाऽबलानां दलित वर्गानां गवां च उद्धाराय सदैव प्रायतत।

(ग) स्वातन्त्र्य भावना महर्षि दयानन्देन अस्माकं हृदयेषु जागरिता।

(घ) नानाविधानि दुःखानि सोढ्वापि नाऽर्थ कर्त्तव्यविमुखा जातः।

(ड.) अस्य महापुरूषस्य ख्याति सर्वत्रः व्याप्ता।

स	क	सरल संस्कृतमेव भारत राष्ट्रस्य राष्ट्रभाषा भवेत्।

ख	प्रसिद्धाः नायकाः संस्कृतस्य प्रशंसां कृतवन्तः।

ग.	भारतस्य राष्ट्रपतिः डॉ. राजेन्द्रप्रसादः आसीत्।

घ.	संस्कृत साहित्य मानवजातेः कृते अमूल्यधनमस्ति।

ड.	कथ्+क्तवतु

**निर्देश :— शुद्ध उत्तर लिखने पर प्रत्येक पर 1—1 अंक प्राप्त होगा।**

17.अ	क	चन्द्रोज्ज्वलाः हाराः पुरूषं न विभूषयन्ति।

ख.	वाण्येका पुरूषं अलंकरोति।

ग.	भूषणानि खलु क्षीयन्ते।

घ.	सततं वाग्भूषणम् भूषणम्।

ड.	निरन्तरम्।

ब	क.	धनोपगूढं गगनम्।

ख.	तारा भास्कराः च दर्शनमभ्युपैति।

ग.	धरणी नर्वे जलोधैः वितृप्ता।

घ.	तमोलिप्ताः दिशः न प्रकाशिताः।

ड.	द्वितीया एकवचनम्

स.	क	कार्यं मनसा चिन्तितम्।

ख.	वाचा कार्यं न प्रकाशयेत्।

ग.	गूढं मन्त्रेण रक्षयेत्।

घ.	कार्ये गूढं नियोजयेत्।

ड.	रक्ष धातु, विधिलिड्गः, प्रथमपुरूषः, एकवचनम्।

निर्देशः— पद्यांश के सही उत्तर लिखने पर प्रत्येक प्रश्न पर 1—1 अंक प्राप्त होगा।

**(18) अपठित गद्यांशः—**

क.	धर्मसाधनम् — शरीरम्	1

ख.	धर्मस्य प्रथमं साधनं शरीरं अस्ति।	1

ग.	परिवृद्धम् उदरं व्याथामेन सड्.ोचं गच्छति।	1

घ.	'शरीरधर्मस्य प्रथमं साधनमस्ति यः व्यायामं करोति तस्य प्राणशक्तेः आपदः स्वयमेव दूरं गच्छन्ति। अस्मिन् लोके जने वयोऽनुसारं को ऽपि व्यायामः अवश्य करणीयः।	2

छात्रवृत्यर्थं आवेदन पत्रम्

माननीयाः प्राचार्यमहोदयाः
शासकीय उच्चतर माध्यमिक विद्यालयः
रहलीनगरम्,, मध्यप्रदेशः
विषय :– छात्रवृत्ति प्रदानार्थं आवेदनम्। } 1 अंक

महोदय,

अहं सविनयं निवेदयामि यत् मम पितुः आर्थिक स्थिति' शोचनीया वर्तते। अहं शिक्षण शुल्कम् अपि दातुम् असमर्था अस्मि। अतः मम कृते श्रीमन्तः छात्रवृत्तिं दापयन्तु इति प्रार्थये। 2 अंक

दिनांड. : 5.11.11

विनयावता
अ, ब, स 1 अंक

---

मित्र कृते पत्रम्

जवाहर नगरम्
इन्दौरम् 1 अंक
दिनांक 8.5.2012

प्रियमित्र कुशलः
नमोनमः } 1 अंक

अत्र कुशलं, तत्रास्तु। महत् हर्षेण सूचयानि यत् अस्मिन वर्षे वार्षिक परीक्षायां अहं प्रथम श्रेण्यां उत्तीर्णा सञ्जाता। अतएव आगामी रविवासरे अस्माभिः मित्राणि जलपानार्थं आगमिष्यन्ति। अस्मिन् अवसरे भवताऽपि अवश्यमेव आगन्तव्यम्। इदं मम निवेदनमस्ति। 2 अंक

भवदीय मित्रम्
अ, ब, स 1 अंक

## 11. सदाचार

सताम् आचारः सदाचारः इत्युच्यते। सज्जनाः विद्यांसो च यथा आचरन्ति तथैव आचरणं सदाचारो भवति। सज्जनाः स्वकीयानि इन्द्रियाणि वशे कृत्वा सर्वैः सह शिष्टतापूर्वकं व्यवहारं कुर्वन्ति। ते सत्यं वदन्ति, मातुः पितुः गुरूजनानां वृद्धानां ज्येष्ठानां च आदरं कुर्वन्ति तेषाम् आज्ञां पालयन्ति, सत्कर्मणि प्रवृत्ताः भवन्ति।

जनस्य समाजस्य राष्ट्रस्य च उन्नत्यै सदाचारस्य महती आवश्यकता वर्तते। सदाचारस्याभ्यासो बाल्यकालादेव भवति। सदाचारेण बुद्धिः वर्धते, नरः धार्मिकः, शिष्टो, विनीतो, बुद्धिमान् च भवति। संसारे सदाचारस्यैवमहत्वं दृश्यते। ये सदाचारिणः भवन्ति, ते एव सर्वत्र आदरं लभन्ते। यस्मिन् देशे जनाः सदाचारिणो भवन्ति तस्यैव सर्वतः उन्नतिर्भवति। अतएव महर्षिभिः ''आचारः परमो धर्मः'' इत्युच्यते। सदाचारी जनः परदारेषुमातृवत्, परधनेषु लोष्ठवत् सर्व भूतेषु च आत्मवत् पश्यति। सदाचारीजनस्य शीलम् एवं परमं भूषणं अस्ति।

————————————

## 2. महाकविः (कालिदासः)

महाकविः कालिदासः मम प्रियः कविः अस्ति। सः संस्कृत भाषायाः श्रेष्ठतमः कविः अस्ति। यादृशः रस–प्रवाहः कालिदासस्य काव्येषु विद्यते सादृशः अन्यत्र नास्ति। सः कविकुलशिरोमणिः अस्ति। कालिदासेन त्राणी नाटकानि, (माविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशकुन्तलम् च) द्वे महाकाव्ये (रघुवंशम् कुमारसंभवं च) द्वि गीतिकाव्ये (मेघदूतम ऋतु संहारम् च) च रचितानि।

कालिदासस्य लोकप्रियतायाः कारणं तस्य प्रसादगुणयुक्ता ललिता शैली अस्ति। कालिदासस्य प्रकृतिचित्रणं अतीव रम्यम् अस्ति। चरित्रचित्रणे कालिदासः अतीवरम्यम् अस्ति। चरित्रचित्रणे कालिदासः अतीव पटुः अस्ति।

कालिदासः महाराजविक्रमादित्यस्य सभाकविः आसीत्। अनुमीयते यत्तस्य जन्मभूमिः उज्जयिनी आसीत्। मेघदूते उज्जयिन्याः भव्यं वर्णनं विद्यते। कालिदासस्य कृतिषु कृत्रिमतायाः अभावः अस्ति। कालिदासस्य साहित्ये काव्यसौन्दर्यं रसनिरूपणं च सर्वत्र दृश्यते। तस्य सूक्तयः सुधासिक्ताः चेतोहराः

सन्ति। कालिदासस्य उपमा प्रयोगः, अपूर्वः अतः साधूच्यते– 'उपमा कालिदासस्य'।

————————————

3. अनुशासनम्

समाजे नियमानां पालनम् अनुशासनं भवति। जीवने अनुशासनस्य विशेष महत्व भवति। प्रत्येक पदे अनुशासनम् परमावश्यकम् अस्ति। अनुशासितः सर्वेभ्यः प्रियः भवति। सामाजिक व्यवस्था हेतु अनुशासनं अत्यन्तावश्यकम् अस्ति। यस्मिन् समाजे अनुशासनं न भवति। तत्र सदैव कलहः भवति। शिक्षकस्य अनुशासन छात्राः निरन्तरं उन्नति पथे गच्छन्ति। प्रकृतिः अपि ईश्वरस्य अनुशासने तिष्ठति। यः नरः पूर्णत्या अनुशासनं पालयति सः स्वजीवने सदा सफलः भवति।

अतः अनुशासनस्य पालनं जीवने बहु आवश्यक भवति।

**निर्देशः– दिये गये निबन्ध में से किसी एक विषय पर शुद्ध एवं सही दस वाक्य लिखने पर प्रत्येक वाक्य पर 1–1 अंक प्राप्त होगा।**